अभ्यासपाठः १०

अत्र अधोरेखाङ्कितानां शब्दानां विभक्ति-रूपाणि परिवर्त्य समीचीनं वाक्यनिर्माणं करोतु ।

	अभ्यासशब्दः	अवशिष्टवाक्यम्
1	अहम्	स्यूतः कुत्रापि नष्टः ।
2	अहम्	प्रातः शीघ्रम् उत्तिष्ठामि ।
3	अहम्	मधुरं रोचते ।
4	अहम्	दश जनाः धनं स्वीकृतवन्तः ।
5	अहम्	किमर्थं पीडयति भवान् ?
6	अहम्	किमर्थम् अनादरः भवतः ?
7	अहम्	सह भवान् अपि आगच्छतु ।

	अभ्यासशब्दः	अवशिष्टवाक्यम्
1	भवान्	अहं धनं न स्वीकृतवान् ।
2	भवान्	अहं ह्यः स्मृतवान् ।
3	भवान्	सः अविल्वासं करोति ।
4	भवान्	सह अहम् अपि आगमिष्यामि ।
5	भवान्	श्वः पुस्तकं दास्यामि ।
6	भवान्	गृहं कुत्र अस्ति ?
7	भवान्	कदा अत्र आगतवान् ?

	अभ्यासशब्दः	अवशिष्टवाक्यम्
1	<u>कः</u>	तत्र स्थितवान् ?
2	<u>कः</u>	भवान् तं ताडितवान् ?
3	<u>कः</u>	परितः कीटाः डयन्ते ?
4	<u>कः</u>	उपन्यासः अद्य अस्ति ?
5	<u>कः</u>	नगरात् सः आगतवान् ?
6	<u>कः</u>	गृहे सः वसति ?
7	<u>कः</u>	शिक्षकः कुप्यते ?

	अभ्यासशब्दः	अवशिष्टवाक्यम्
1	<u>का</u>	तत्र गच्छति ?
2	<u>का</u>	माता एषा ?
3	<u>का</u>	धनं ददाति भवती ?
4	<u>का</u>	स्नेहः अस्ति भवत्याः ?
5	<u>का</u>	भवती पश्यति ?
6	<u>का</u>	भवती धनं स्वीकरोति ?
7	<u>का</u>	सह माता गच्छति ?

Encoded by Sarada Kalisetty
Send corrections to sanskrit@cheerful.com